# .. Praudhanubhuti ..

# ॥ प्रौढानुभूतिः ॥

## Document Information

Text title : Praudhanubhuti
File name : praudha.itx
Location : doc_z_misc_shankara
Author : Adi Shankaracharya
Language : Sanskrit
Subject : vedanta/hinduism/religion
Transliterated by : Sunder Hattangadi (sunderh at hotmail)
Proofread by : Sunder Hattangadi (sunderh at hotmail)
Latest update : April 3, 2002
Send corrections to : Sanskrit@cheerful.com
Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ પ્રૌઢાનુભૂતિઃ ॥

પ્રૌઢપ્રૌઢનિજાનુભૂતિગલિતદ્વૈતેન્દ્રજાલો ગુરુ-
ર્ગૂઢં ગૂઢમઘૌઘદુષ્ટકુધિયાં સ્પષ્ટં સુધીશાલિનામ્ ।
સ્વાન્તે સમ્યગિહાનુભૂતમપિ સચ્છિશિષ્યાવબોધાય ત-
ત્સત્યં સંસ્મૃતવાન્સમસ્તજગતાં નૈજં નિજાલોકનાત્ ॥ ૧॥

દ્વૈતં મય્યખિલં સમુત્થિતમિદં મિથ્યા મનઃકલ્પિતં
તોયં તોયવિવર્જિતે મરુતલે ભ્રાન્ત્યૈવ સિદ્ધં ન હિ ।
યદ્યેવં ખલુ દૃશ્યમેતદખિલં નાહં ન વા તન્મમ
પ્રૌઢાનન્દચિદેકસન્મયવપુઃ શુદ્ધોઽસ્મ્યખણ્ડોઽસ્મ્યહમ્ ॥ ૨॥

દેહો નાહમચેતનોઽયમનિશં કુડ્યાદિવન્નિશ્ચિતો
નાહં પ્રાણમયોઽપિ વા દૃતિધૃતો વાયુર્યથા નિશ્ચિતઃ ।
સોઽહં નાપિ મનોમયઃ કપિચલઃ કાર્પણ્યદુષ્ટો ન વા
બુદ્ધિર્બુદ્ધકુવૃત્તિકેવ કુહના નાજ્ઞાનમન્ધંતમઃ ॥ ૩ ॥

નાહં ખાદિરપિ સ્ફુટં મરુતલભ્રાજત્પયઃસામ્યત-
સ્તેભ્યો નિત્યવિલક્ષણોઽખિલદૃશિઃ સૌરપ્રકાશો યથા ।
દૃશ્યૈઃ સઙ્ગવિવર્જિતો ગગનવત્સમ્પૂર્ણરૂપોઽસ્મ્યહં
વસ્તુસ્થિત્યનુરોધતસ્ત્વહમિદં વીચ્યાદિ સિન્ધુર્યથા ॥ ૪॥

નિર્દ્વૈતોઽસ્મ્યહમસ્મિ નિર્મલચિદાકાશોઽસ્મિ પૂર્ણોઽસ્મ્યહં
નિર્દેહોઽસ્મિ નિરિન્દ્રિયોઽસ્મિ નિતરાં નિષ્પ્રાણવર્ગોઽસ્મ્યહમ્ ।
નિર્મુક્તાશુભમાનસોઽસ્મિ વિગલદ્વિજ્ઞાનકોશોઽસ્મ્યહં
નિર્માયોઽસ્મિ નિરન્તરોઽસ્મિ વિપુલપ્રૌઢપ્રકાશોઽસ્મ્યહમ્ ॥ ૫॥

મત્તોઽન્યન્ન હિ કિંચિદસ્તિ યદિ ચિદ્ભાસ્યં તતસ્તન્મૃષા
ગુઞ્જાવહ્નિવદેવ સર્વકલનાધિષ્ઠાનભૂતોઽસ્મ્યહમ્ ।
સર્વસ્યાપિ દૃગસ્મ્યહં સમરસઃ શાન્તોઽસ્મ્યપાપોઽસ્મ્યહં
પૂર્ણોઽસ્મિ દ્વયવર્જિતોઽસ્મિ વિપુલાકાશોઽસ્મિ નિત્યોઽસ્મ્યહમ્ ॥ ૬॥

મય્યસ્મિન્પરમાર્થકે શ્રુતિશિરોવેદ્યે સ્વતો ભાસને
કા વા વિપ્રતિપત્તિરેતદખિલં ભાત્યેવ યત્સંનિધેઃ ।
સૌરાલોકવશાત્પ્રતીતમખિલં પશ્યન્ન તસ્મિઞ્જનઃ
સંદિગ્ધોઽસ્ત્યત એવ કેવલશિવઃ કોઽપિ પ્રકાશોઽસ્મ્યહમ્ ॥ ૭॥

નિત્યસ્ફૂર્તિમયોઽસ્મિ નિર્મલસદાકાશોઽસ્મિ શાન્તોઽસ્મ્યહં
નિત્યાનન્દમયોઽસ્મિ નિર્ગતમહામોહાન્ધકારોઽસ્મ્યહમ્ ।

વિજ્ઞાતં પરમાર્થતત્ત્વમખિલં નૈજં નિરસ્તાશુભં
મુક્તપ્રાપ્યમપાસ્તભેદકલનાકૈવલ્યસંજ્ઞોઽસ્મ્યહમ્ ॥ ૮॥

સ્વાપ્નદ્વૈતવદેવ જાગ્રતમપિ દ્વૈતં મનોમાત્રકં
મિથ્યેત્યેવ વિહાય સચ્ચિદમલસ્વાન્તૈકરૂપોઽસ્મ્યહમ્ ।
યદ્વા વેદ્યમશેષમેતદનિશં મદ્રૂપમેવેત્યપિ
જ્ઞાત્વા ત્યક્તમરુન્મહોદધિરિવ પ્રૌઢો ગભીરોઽસ્મ્યહમ્ ॥ ૯॥

ગન્તવ્યં કિમિહાસ્તિ સર્વપરિપૂર્ણસ્યાપ્યખણ્ડાકૃતેઃ
કર્તવ્યં કિમિહાસ્તિ નિષ્ક્રિયતનોર્મોક્ષૈકરૂપસ્ય મે ।
નિર્દ્વૈતસ્ય ન હેયમન્યદપિ વા નો વાપ્યુપેયાન્તરં
શાન્તોઽદ્યાસ્મિ વિમુક્તતોયવિમલો મેઘો યથા નિર્મલઃ ॥ ૧૦॥

કિં ન પ્રાપ્તમિતઃ પુરા કિમધુના લબ્ધં વિચારાદિના
યસ્માત્તત્સુખરૂપમેવ સતતં જાજ્વલ્યમાનોઽસ્મ્યહમ્ ।
કિં વાપેક્ષ્યમિહાપિ મચ્ચતિતરાં મિથ્યાવિચારાદિકં
દ્વૈતાદ્વૈતવિવર્જિતે સમરસે મૌનં પરં સમ્મતમ્ ॥ ૧૧॥

શ્રોતવ્યં ચ કિમસ્તિ પૂર્ણસુદૃશો મિથ્યાપરોક્ષસ્ય મે
મન્તવ્યં ચ ન મેઽસ્તિ કિંચિદપિ વા નિઃસંશયજ્યોતિષઃ ।
ધ્યાતૃધ્યેયવિભેદહાનિવપુષો ન ધ્યેયમસ્ત્યેવ મે
સર્વાત્મૈકમહારસસ્ય સતતં નો વા સમાધિર્મમ ॥ ૧૨॥

આત્માનાત્મવિવેચનાપિ મમ નો વિદ્વત્કૃતા રોચતે-
ઽનાત્મા નાસ્તિ યદસ્તિ ગોચરવપુઃ કો વા વિવેક્તું ક્ષમી ।
મિથ્યાવાદવિચારચિન્તનમહો કુર્વન્ત્યદૃષ્ટાત્મકા
ભ્રાન્તા એવ ન પારગા દૃઢધિયસ્તૂષ્ણીં શિલાવત્સ્થિતઃ ॥ ૧૩ ॥

વસ્તુસ્થિત્યનુરોધતસ્ત્વહમહો કશ્ચિત્પદાર્થો ન ચા-
પ્યેવં કોઽપિ વિભામિ સંતતદૃશી વાઙ્માનસાગોચરઃ ।
નિષ્પાપોઽસ્મ્યભયોઽસ્મ્યહં વિગતદુઃશઙ્કાકલઙ્કોઽસ્મ્યહં
સંશાન્તાનુપમાનશીતલમહઃપ્રૌઢપ્રકાશોઽસ્મ્યહમ્ ॥ ૧૪॥

યોઽહં પૂર્વમિતઃ પ્રશાન્તકલનાશુદ્ધોઽસ્મિ બુદ્ધોઽસ્મ્યહં
યસ્માન્મત્ત ઇદં સમુત્થિતમભૂદેતન્મયા ધાર્યતે ।
મય્યેવ પ્રલયં પ્રયાતિ નિરધિષ્ઠાનાય તસ્મૈ સદા
સત્યાનન્દચિદાત્મકાય વિપુલપ્રજ્ઞાય મહ્યં નમઃ ॥ ૧૫॥

સત્તાચિત્સુખરૂપમસ્તિ સતતં નાહં ચ ન ત્વં મૃષા
નેદં વાપિ જગત્પ્રદૃષ્ટમખિલં નાસ્તીતિ જાનીહિ ભો ।

યત્પ્રોક્તં કરુણાવશાત્ત્વયિ મયા તત્સત્યમેતત્સ્ફુટં
શ્રદ્ધત્સ્વાનઘ શુદ્ધબુદ્ધિરસિ ચેન્માત્રાસ્તુ તે સંશયઃ ॥ ૧૬॥

સ્વારસ્યૈકસુબોધચારુમનસે પ્રૌઢાનુભૂતિસ્ત્વિયં
દાતવ્યા ન તુ મોહદુગ્ધકુધિયે દુષ્ટાન્તરઙ્ગાય ચ ।
યેયં રમ્યવિદર્પિતોત્તમશિરઃ પ્રાપ્તા ચકાસ્તિ સ્વયં
સા ચેન્મર્કટહસ્તદેશપતિતા કિં રાજતે કેતકી ॥ ૧૭॥

ઇતિ શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યસ્ય
શ્રીગોવિન્દભગવત્પૂજ્યપાદશિષ્યસ્ય
શ્રીમચ્છઙ્કરભગવતઃ કૃતૌ
પ્રૌઢાનુભૂતિઃ સમ્પૂર્ણા ॥

---

Encoded by Sunder Hattangadi (sunderh at hotmail.com)

.. Praudhanubhuti ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*